# Rudragita from Shrimadbhagavatam

# શ્રીમદ્ભાગવતાન્તર્ગતમ્ રુદ્રગીતમ્

## Document Information

Text title : shrimadbhAgavatAntargataM rudragIta

File name : rudragIta.itx

Category : gItam, giitaa, vyAsa, shiva

Location : doc_giitaa

Author : maharShi vyAsa

Description-comments : Bhagavatam skanda 4 adhyAya 24

Latest update : November 10, 2012

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# શ્રીમદ્ભાગવતાન્તર્ગતમ્ રુદ્રગીતમ્

મૈત્રેય ઉવાચ ।
વિજિતાશ્વોઽધિરાજાસીત્પૃથુપુત્રઃ પૃથુશ્રવાઃ ।
યવીયોભ્યોઽદદાત્કાષ્ઠા ભ્રાતૃભ્યો ભ્રાતૃવત્સલઃ ॥ ૪.૨૪.૦૧॥

હર્યક્ષાયાદિશત્પ્રાચીં ધૂમ્રકેશાય દક્ષિણામ્ ।
પ્રતીચીં વૃકસંજ્ઞાય તુર્યાં દ્રવિણસે વિભુઃ ॥ ૪.૨૪.૦૨॥

અન્તર્ધાનગતિં શક્રાલ્લબ્ધ્વાન્તર્ધાનસંજ્ઞિતઃ ।
અપત્યત્રયમાધત્ત શિખણ્ડિન્યાં સુસમ્મતમ્ ॥ ૪.૨૪.૦૩॥

પાવકઃ પવમાનશ્ચ શુચિરિત્યગ્નયઃ પુરા ।
વસિષ્ઠશાપાદુત્પન્નાઃ પુનર્યોગગતિં ગતાઃ ॥ ૪.૨૪.૦૪॥

અન્તર્ધાનો નભસ્વત્યાં હવિર્ધાનમવિન્દત ।
ય ઇન્દ્રમશ્વહર્તારં વિદ્વાનપિ ન જઘ્નિવાન્ ॥ ૪.૨૪.૦૫॥

રાજ્ઞાં વૃત્તિં કરાદાન દણ્ડશુલ્કાદિદારુણામ્ ।
મન્યમાનો દીર્ઘસત્ર વ્યાજેન વિસસર્જ હ ॥ ૪.૨૪.૦૬॥

તત્રાપિ હંસં પુરુષં પરમાત્માનમાત્મદૃક્ ।
યજંસ્તલ્લોકતામાપ કુશલેન સમાધિના ॥ ૪.૨૪.૦૭॥

હવિર્ધાનાદ્ધવિર્ધાની વિદુરાસૂત ષટ્સુતાન્ ।
બર્હિષદં ગયં શુક્લં કૃષ્ણં સત્યં જિતવ્રતમ્ ॥ ૪.૨૪.૦૮॥

બર્હિષત્સુમહાભાગો હાવિર્ધાનિઃ પ્રજાપતિઃ ।
ક્રિયાકાણ્ડેષુ નિષ્ણાતો યોગેષુ ચ કુરૂદ્વહ ॥ ૪.૨૪.૦૯॥

યસ્યેદં દેવયજનમનુયજ્ઞં વિતન્વતઃ ।
પ્રાચીનાગ્રૈઃ કુશૈરાસીદાસ્તૃતં વસુધાતલમ્ ॥ ૪.૨૪.૧૦॥

સામુદ્રીં દેવદેવોક્તામુપયેમે શતદ્રુતિમ્

યાં વીક્ષ્ય ચારુસર્વાઙ્ગીં કિશોરીં સુષ્ઠ્વલઙ્કૃતામ્ ।
૦૪૨૪૦૧૧૩ પરિક્રમન્તીમુદ્વાહે ચકમેઽગ્નિઃ શુકીમિવ .. ..

વિબુધાસુરગન્ધર્વ મુનિસિદ્ધનરોરગાઃ ।
વિજિતાઃ સૂર્યયા દિક્ષુ ક્વણયન્ત્યૈવ નૂપુરૈઃ ॥ ૪.૨૪.૧૨ ॥

પ્રાચીનબર્હિષઃ પુત્રાઃ શતદ્રુત્યાં દશાભવન્ ।
તુલ્યનામવ્રતાઃ સર્વે ધર્મસ્નાતાઃ પ્રચેતસઃ ॥ ૪.૨૪.૧૩ ॥

પિત્રાદિષ્ટાઃ પ્રજાસર્ગે તપસેઽર્ણવમાવિશન્ ।
દશવર્ષસહસ્રાણિ તપસાર્ચંસ્તપસ્પતિમ્ ॥ ૪.૨૪.૧૪ ॥

યદુક્તં પથિ દૃષ્ટેન ગિરિશેન પ્રસીદતા ।
તદ્ધ્યાયન્તો જપન્તશ્ચ પૂજયન્તશ્ચ સંયતાઃ ॥ ૪.૨૪.૧૫ ॥

વિદુર ઉવાચ ।
પ્રચેતસાં ગિરિત્રેણ યથાસીત્પથિ સઙ્ગમઃ ।
યદુતાહ હરઃ પ્રીતસ્તન્નો બ્રહ્મન્વદાર્થવત્ ॥ ૪.૨૪.૧૬ ॥

સઙ્ગમઃ ખલુ વિપ્રર્ષે શિવેનેહ શરીરિણામ્ ।
દુર્લભો મુનયો દધ્યુરસઙ્ગાદ્યમભીપ્સિતમ્ ॥ ૪.૨૪.૧૭ ॥

આત્મારામોઽપિ યસ્ત્વસ્ય લોકકલ્પસ્ય રાધસે ।
શક્ત્યા યુક્તો વિચરતિ ઘોરયા ભગવાન્ભવઃ ॥ ૪.૨૪.૧૮ ॥

મૈત્રેય ઉવાચ ।
પ્રચેતસઃ પિતુર્વાક્યં શિરસાદાય સાધવઃ ।
દિશં પ્રતીચીં પ્રયયુસ્તપસ્યાદૃતચેતસઃ ॥ ૪.૨૪.૧૯ ॥

સસમુદ્રમુપ વિસ્તીર્ણમપશ્યન્સુમહત્સરઃ ।
મહન્મન ઇવ સ્વચ્છં પ્રસન્નસલિલાશયમ્ ॥ ૪.૨૪.૨૦ ॥

નીલરક્તોત્પલામ્ભોજ કહ્લારેન્દીવરાકરમ્ ।
હંસસારસચક્રાહ્વ કારણ્ડવનિકૂજિતમ્ ॥ ૪.૨૪.૨૧ ॥

મત્તભ્રમરસૌસ્વર્ય હૃષ્ટરોમલતાઙ્ઘ્રિપમ્ ।
પદ્મકોશરજો દિક્ષુ વિક્ષિપત્પવનોત્સવમ્ ॥ ૪.૨૪.૨૨ ॥

તત્ર ગાન્ધર્વમાકર્ણ્ય દિવ્યમાર્ગમનોહરમ્ ।
વિસિસ્મ્યૂ રાજપુત્રાસ્તે મૃદઙ્ગપણવાદ્યનુ ॥ ૪.૨૪.૨૩ ॥

તર્હ્યેવ સરસસ્તસ્માન્નિષ્ક્રામન્તં સહાનુગમ્ ।
ઉપગીયમાનમમર પ્રવરં વિબુધાનુગૈઃ ॥ ૪.૨૪.૨૪॥

તપ્તહેમનિકાયાભં શિતિકણ્ઠં ત્રિલોચનમ્ ।
પ્રસાદસુમુખં વીક્ષ્ય પ્રણેમુર્જાતકૌતુકાઃ ॥ ૪.૨૪.૨૫॥

સ તાન્પ્રપન્નાર્તિહરો ભગવાન્ધર્મવત્સલઃ ।
ધર્મજ્ઞાન્શીલસમ્પન્નાન્પ્રીતઃ પ્રીતાનુવાચ હ ॥ ૪.૨૪.૨૬॥

શ્રીરુદ્ર ઉવાચ ।
યૂયં વેદિષદઃ પુત્રા વિદિતં વશ્ચિકીર્ષિતમ્ ।
અનુગ્રહાય ભદ્રં વ એવં મે દર્શનં કૃતમ્ ॥ ૪.૨૪.૨૭॥

યઃ પરં રંહસઃ સાક્ષાત્ત્રિગુણાજ્જીવસંજ્ઞિતાત્ ।
ભગવન્તં વાસુદેવં પ્રપન્નઃ સ પ્રિયો હિ મે ॥ ૪.૨૪.૨૮॥

સ્વધર્મનિષ્ઠઃ શતજન્મભિઃ પુમાન્વિરિઞ્ચતામેતિ તતઃ પરં હિ મામ્ ।
અવ્યાકૃતં ભાગવતોऽથ વૈષ્ણવં પદં યથાહં વિબુધાઃ કલાત્યયે ॥ ૪.૨૪.૨૯॥

અથ ભાગવતા યૂયં પ્રિયાઃ સ્થ ભગવાન્યથા ।
ન મદ્ભાગવતાનાં ચ પ્રેયાનન્યોऽસ્તિ કર્હિચિત્ ॥ ૪.૨૪.૩૦॥

ઇદં વિવિક્તં જપ્તવ્યં પવિત્રં મઙ્ગલં પરમ્ ।
નિઃશ્રેયસકરં ચાપિ શ્રૂયતાં તદ્વદામિ વઃ ॥ ૪.૨૪.૩૧॥

મૈત્રેય ઉવાચ ।
ઇત્યનુક્રોશહૃદયો ભગવાનાહ તાઞ્છિવઃ ।
બદ્ધાઞ્જલીન્રાજપુત્રાન્નારાયણપરો વચઃ ॥ ૪.૨૪.૩૨॥

શ્રીરુદ્ર ઉવાચ ।
જિતં ત આત્મવિદ્વર્ય સ્વસ્તયે સ્વસ્તિરસ્તુ મે ।
ભવતારાધસા રાદ્ધં સર્વસ્મા આત્મને નમઃ ॥ ૪.૨૪.૩૩॥

નમઃ પઙ્કજનાભાય ભૂતસૂક્ષ્મેન્દ્રિયાત્મને ।
વાસુદેવાય શાન્તાય કૂટસ્થાય સ્વરોચિષે ॥ ૪.૨૪.૩૪॥

સઙ્કર્ષણાય સૂક્ષ્માય દુરન્તાયાન્તકાય ચ ।
નમો વિશ્વપ્રબોધાય પ્રદ્યુમ્નાયાન્તરાત્મને ॥ ૪.૨૪.૩૫॥

નમો નમોऽનિરુદ્ધાય હૃષીકેશેન્દ્રિયાત્મને ।

નમઃ પરમહંસાય પૂર્ણાય નિભૃતાત્મને ॥ ૪.૨૪.૩૬॥

સ્વર્ગાપવર્ગદ્વારાય નિત્યં શુચિષદે નમઃ ।
નમો હિરણ્યવીર્યાય ચાતુર્હોત્રાય તન્તવે ॥ ૪.૨૪.૩૭॥

નમ ઊર્જ ઇષે ત્રય્યાઃ પતયે યજ્ઞરેતસે ।
તૃપ્તિદાય ચ જીવાનાં નમઃ સર્વરસાત્મને ॥ ૪.૨૪.૩૮॥

સર્વસત્ત્વાત્મદેહાય વિશેષાય સ્થવીયસે ।
નમસ્ત્રૈલોક્યપાલાય સહ ઓજોબલાય ચ ॥ ૪.૨૪.૩૯॥

અર્થલિઙ્ગાય નભસે નમોઽન્તર્બહિરાત્મને ।
નમઃ પુણ્યાય લોકાય અમુષ્મૈ ભૂરિવર્ચસે ॥ ૪.૨૪.૪૦॥

પ્રવૃત્તાય નિવૃત્તાય પિતૃદેવાય કર્મણે ।
નમોઽધર્મવિપાકાય મૃત્યવે દુઃખદાય ચ ॥ ૪.૨૪.૪૧॥

નમસ્ત આશિષામીશ મનવે કારણાત્મને
નમો ધર્માય બૃહતે કૃષ્ણાયાકુણ્ઠમેધસે
પુરુષાય પુરાણાય સાઙ્ખ્યયોગેશ્વરાય ચ ॥ ૪.૨૪.૪૨॥

શક્તિત્રયસમેતાય મીઢુષેઽહઙ્કૃતાત્મને ।
ચેતાકૂતિરૂપાય નમો વાચો વિભૂતયે ॥ ૪.૨૪.૪૩॥

દર્શનં નો દિદૃક્ષૂણાં દેહિ ભાગવતાર્ચિતમ્ ।
રૂપં પ્રિયતમં સ્વાનાં સર્વેન્દ્રિયગુણાઞ્જનમ્ ॥ ૪.૨૪.૪૪॥

સ્નિગ્ધપ્રાવૃડ્ઘનશ્યામં સર્વસૌન્દર્યસઙ્ગ્રહમ્ ।
ચાર્વાયતચતુર્બાહુ સુજાતરુચિરાનનમ્ ॥ ૪.૨૪.૪૫॥

પદ્મકોશપલાશાક્ષં સુન્દરભ્રુ સુનાસિકમ્ ।
સુદ્વિજં સુકપોલાસ્યં સમકર્ણવિભૂષણમ્ ॥ ૪.૨૪.૪૬॥

પ્રીતિપ્રહસિતાપાઙ્ગમલકૈ રૂપશોભિતમ્ ।
લસત્પઙ્કજકિઞ્જલ્ક દુકૂલં મૃષ્ટકુણ્ડલમ્ ॥ ૪.૨૪.૪૭॥

સ્ફુરત્કિરીટવલય હારનૂપુરમેખલમ્ ।
શઙ્ખચક્રગદાપદ્મ માલામણ્યુત્તમર્દ્ધિમત્ ॥ ૪.૨૪.૪૮॥

સિંહસ્કન્ધત્વિષો બિભ્રત્સૌભગગ્રીવકૌસ્તુભમ્ ।
શ્રિયાનપાયિન્યા ક્ષિપ્ત નિકષાશ્મોરસોલ્લસત્ ॥ ૪.૨૪.૪૯॥

પૂરરેચકસંવિગ્ન વલિવલ્ગુદલોદરમ્ ।
પ્રતિસઙ્ક્રામયદ્વિશ્વં નાભ્યાવર્તગભીરયા ॥ ૪.૨૪.૫૦॥

શ્યામશ્રોણ્યધિરોચિષ્ણુ દુકૂલસ્વર્ણમેખલમ્ ।
સમચાર્વઙ્ઘ્રિજઙ્ઘોરુ નિમ્નજાનુસુદર્શનમ્ ॥ ૪.૨૪.૫૧॥

પદા શરત્પદ્મપલાશરોચિષા નખદ્યુભિર્નોઽન્તરઘં વિધુન્વતા ।
પ્રદર્શય સ્વીયમપાસ્તસાધ્વસં પદં ગુરો માર્ગગુરુસ્તમોજુષામ્ ॥ ૪.૨૪.૫૨॥

એતદ્રૂપમનુધ્યેયમાત્મશુદ્ધિમભીપ્સતામ્ ।
યદ્ભક્તિયોગોઽભયદઃ સ્વધર્મમનુતિષ્ઠતામ્ ॥ ૪.૨૪.૫૩॥

ભવાન્ભક્તિમતા લભ્યો દુર્લભઃ સર્વદેહિનામ્ ।
સ્વારાજ્યસ્યાપ્યભિમત એકાન્તેનાત્મવિદ્ગતિઃ ॥ ૪.૨૪.૫૪॥

તં દુરારાધ્યમારાધ્ય સતામપિ દુરાપયા ।
એકાન્તભક્ત્યા કો વાઞ્છેત્પાદમૂલં વિના બહિઃ ॥ ૪.૨૪.૫૫॥

યત્ર નિર્વિષ્ટમરણં કૃતાન્તો નાભિમન્યતે ।
વિશ્વં વિધ્વંસયન્વીર્ય શૌર્યવિસ્ફૂર્જિતભ્રુવા ॥ ૪.૨૪.૫૬॥

ક્ષણાર્ધેનાપિ તુલયે ન સ્વર્ગં નાપુનર્ભવમ્ ।
ભગવત્સઙ્ગિસઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૪.૨૪.૫૭॥

અથાનઘાઙ્ઘ્રેસ્તવ કીર્તિતીર્થયોરન્તર્બહિઃસ્નાનવિધૂતપાપ્મનામ્ ।
ભૂતેષ્વનુક્રોશસુસત્ત્વશીલિનાં સ્યાત્સઙ્ગમોઽનુગ્રહ એષ નસ્તવ ॥ ૪.૨૪.૫૮॥

ન યસ્ય ચિત્તં બહિરર્થવિભ્રમં તમોગુહાયાં ચ વિશુદ્ધમાવિશત્ ।
યદ્ભક્તિયોગાનુગૃહીતમઞ્જસા મુનિર્વિચષ્ટે નનુ તત્ર તે ગતિમ્ ॥ ૪.૨૪.૫૯॥

યત્રેદં વ્યજ્યતે વિશ્વં વિશ્વસ્મિન્નવભાતિ યત્ ।
તત્ત્વં બ્રહ્મ પરં જ્યોતિરાકાશમિવ વિસ્તૃતમ્ ॥ ૪.૨૪.૬૦॥

યો માયયેદં પુરુરૂપયાસૃજદ્બિભર્તિ ભૂયઃ ક્ષપયત્યવિક્રિયઃ ।
યદ્ભેદબુદ્ધિઃ સદિવાત્મદુઃસ્થયા ત્વમાત્મતન્ત્રં ભગવન્પ્રતીમહિ ॥ ૪.૨૪.૬૧॥

ક્રિયાકલાપૈરિદમેવ યોગિનઃ શ્રદ્ધાન્વિતાઃ સાધુ યજન્તિ સિદ્ધયે ।
ભૂતેન્દ્રિયાન્તઃકરણોપલક્ષિતં વેદે ચ તન્ત્રે ચ ત એવ કોવિદાઃ ॥ ૪.૨૪.૬૨॥

ત્વમેક આદ્યઃ પુરુષઃ સુપ્તશક્તિસ્તયા રજઃસત્ત્વતમો વિભિદ્યતે ।

મહાનહં ખં મરુદગ્નિવાર્ધરાઃ સુરર્ષયો ભૂતગણા ઇદં યતઃ ॥ ૪.૨૪.૬૩॥

સૃષ્ટં સ્વશક્ત્યેદમનુપ્રવિષ્ટશ્ચતુર્વિધં પુરમાત્માંશકેન ।
અથો વિદુસ્તં પુરુષં સન્તમન્તર્ભુઙ્ક્તે હૃષીકૈર્મધુ સારઘં યઃ ॥ ૪.૨૪.૬૪॥

સ એષ લોકાનતિચણ્ડવેગો વિકર્ષસિ ત્વં ખલુ કાલયાનઃ ।
ભૂતાનિ ભૂતૈરનુમેયતત્ત્વો ઘનાવલીર્વાયુરિવાવિષહ્યઃ ॥ ૪.૨૪.૬૫॥

પ્રમત્તમુચ્ચૈરિતિ કૃત્યચિન્તયા પ્રવૃદ્ધલોભં વિષયેષુ લાલસમ્ ।
ત્વમપ્રમત્તઃ સહસાભિપદ્યસે ક્ષુલ્લેલિહાનોઽહિરિવાખુમન્તકઃ ॥ ૪.૨૪.૬૬॥

કસ્ત્વત્પદાબ્જં વિજહાતિ પણ્ડિતો યસ્તેઽવમાનવ્યયમાનકેતનઃ ।
વિશઙ્કયાસ્મદ્ગુરુરર્ચતિ સ્મ યદ્વિનોપપત્તિં મનવશ્ચતુર્દશ ॥ ૪.૨૪.૬૭॥

અથ ત્વમસિ નો બ્રહ્મન્પરમાત્મન્વિપશ્ચિતામ્ ।
વિશ્વં રુદ્રભયધ્વસ્તમકુતશ્ચિદ્ભયા ગતિઃ ॥ ૪.૨૪.૬૮॥

ઇદં જપત ભદ્રં વો વિશુદ્ધા નૃપનન્દનાઃ ।
સ્વધર્મમનુતિષ્ઠન્તો ભગવત્યર્પિતાશયાઃ ॥ ૪.૨૪.૬૯॥

તમેવાત્માનમાત્મસ્થં સર્વભૂતેષ્વવસ્થિતમ્ ।
પૂજયધ્વં ગૃણન્તશ્ચ ધ્યાયન્તશ્ચાસકૃદ્ધરિમ્ ॥ ૪.૨૪.૭૦॥

યોગાદેશમુપાસાદ્ય ધારયન્તો મુનિવ્રતાઃ ।
સમાહિતધિયઃ સર્વ એતદભ્યસતાદૃતાઃ ॥ ૪.૨૪.૭૧॥

ઇદમાહ પુરાસ્માકં ભગવાન્વિશ્વસૃક્પતિઃ ।
ભૃગ્વાદીનામાત્મજાનાં સિસૃક્ષુઃ સંસિસૃક્ષતામ્ ॥ ૪.૨૪.૭૨॥

તે વયં નોદિતાઃ સર્વે પ્રજાસર્ગે પ્રજેશ્વરાઃ ।
અનેન ધ્વસ્તતમસઃ સિસૃક્ષ્મો વિવિધાઃ પ્રજાઃ ॥ ૪.૨૪.૭૩॥

અથેદં નિત્યદા યુક્તો જપન્નવહિતઃ પુમાન્ ।
અચિરાચ્છ્રેય આપ્નોતિ વાસુદેવપરાયણઃ ॥ ૪.૨૪.૭૪॥

શ્રેયસામિહ સર્વેષાં જ્ઞાનં નિઃશ્રેયસં પરમ્ ।
સુખં તરતિ દુષ્પારં જ્ઞાનનૌર્વ્યસનાર્ણવમ્ ॥ ૪.૨૪.૭૫॥

ય ઇમં શ્રદ્ધયા યુક્તો મદ્ગીતં ભગવત્સ્તવમ્ ।
અધીયાનો દુરારાધ્યં હરિમારાધયત્યસૌ ॥ ૪.૨૪.૭૬॥

વિન્દતે પુરુષોઽમુષ્માદ્યદ્યદિચ્છત્યસત્વરમ્ ।
મદ્ગીતગીતાત્સુપ્રીતાચ્છ્રેયસામેકવલ્લભાત્ ॥ ૪.૨૪.૭૭॥

ઇદં યઃ કલ્ય ઉત્થાય પ્રાઞ્જલિઃ શ્રદ્ધયાન્વિતઃ ।
શ‍ૃણુયાચ્છ્રાવયેન્મર્ત્યો મુચ્યતે કર્મબન્ધનૈઃ ॥ ૪.૨૪.૭૮॥

ગીતં મયેદં નરદેવનન્દનાઃ પરસ્ય પુંસઃ પરમાત્મનઃ સ્તવમ્ ।
જપન્ત એકાગ્રધિયસ્તપો મહત્ચરધ્વમન્તે તત આપ્સ્યથેપ્સિતમ્ ॥ ૪.૨૪.૭૯॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પરમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે રુદ્રગીતં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૪.૨૪॥

Bhagavatam skandha 4, adhyAya 24

---

*Rudragita from Shrimadbhagavatam*

pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*